No. २०४६-घ

Title १-: विष्णुधर्मोत्तरे अपराजितास्तोत्रम्
२-: भैरवाष्टकम्

Author २-: काशीनाथ:

Extent १+२=३ Age
(१)-(२)

Subject पुराणम् वृ.कां.विष्णु:। तन्त्रम्
(१) (२)

क विष्णुधर्मोत्तरे अपराजितास्तोत्रम्

ख भैरवाष्टकस्य पूजाविधिः स्तोत्रंच

१०४५९

पत्राणि ३

श्रीगणेशायनमः ॐ अपराजितास्तोत्रमंत्रस्य श्रीवेदव्यासऋषिः अनुष्टुप्छं
दः क्लींबीजं हंशक्तिः ममसर्वाभिष्टसिध्यर्थेजपेपाठेविनियोगः मार्कंडेयोवा
च भक्तएष्वेंमुनयः सर्वेसर्वकामार्थसिद्धिदां असिद्धसाधिनींदेवीं वैष्णवीः
मपराजितां ॐनमोभगवतेवासुदेवाय ॐनमोस्त्वनंतायसहस्रशीर्षायक्षी
रोदार्णवशायिने शेषभोगपर्यंकाय गरुडवाहनाय अजायअजितायअपरा
जिताय पीतवाससेवासुदेवशंकर्षणप्रद्युम्नअनिरुद्धायशेषमत्स्यकूर्मवरा
त्रिविक्रम हनरसिंघवामनरामरामरामवरप्रदायनमोस्तुतेस्वाहा असुरदैत्यदानवय
क्षराक्षसभूतप्रेतपिशाचकिंनरकूष्मांडसिद्धयोगिनीडाकिनीशाकिनीस्कंद
पुरोगान्ग्रहान्नक्षत्रग्रहांश्चान्यान् हन२ पच२ मथ२ विध्वंसय२ विद्रावय२
चूर्णय२ त्रासय२ खेदय२ चक्रेणवज्रेणभल्लेनगदयामुशलेनहलेनभस्मी
कुरु२ स्वाहा ॐसहस्रबाहोसहस्रप्रहरणायुधजय२ विजय२ अजितअमितअ
पराजितअप्रतिहतसहस्रनेत्र ज्वल२ प्रज्वल२ विश्वरूपबहुरूपमधुसूदनम
हावराहअच्युतमहापुरुषपुरुषोत्तमपद्मनाभवैकुंठानिरुद्धनारायणगोविंद
केशव दामोदरहृषीकेशसर्वासुरोत्सादनसर्वमंत्रप्रभंजन सर्वदेवनमस्कृत्यसर्वबं
ब धनविमोचन सर्वशत्रुशंकरसर्वाहितप्रमर्द्दनसर्वायुधप्रमर्द्दनैसर्वग्रहनिवा नं
रणसर्वरोगप्रशमनसर्वपापविनाशनजनार्द्दननमोस्तुतेस्वाहा मम्मामपरा

सर्वज्वरविनाशन२

जितां परमवैष्णवीं पठति सिद्धां पठति सिद्धां जपति २ स्मी द्धां स्मरति २ सिद्धां महाविद्यां
पठति जपति २ स्मरति शृणोति धारयति कीर्त्तयति वा ॥ न तस्याग्निवायुवज्रोपलाश
निभयं न वर्षभयं न समुद्रभयं न राजभयं न ग्रहभयं न चौरभयं वा न भवेत् क्वचि
दान्धकारस्त्रीराजकुलविषोपविषमगरलवशीकरणविद्वेषणोच्चाटनवं
धबंधनभयं श्वानश्वापदभयं वा न भवेत् एतैर्मंत्रैरुदाहृतैः सिद्धैः संसिद्धपूजनैः
स्तु यथा नमस्ते स्वनघे भये मिते ऽजिते ऽपराजिते पठति सिद्धे पठति जपति सिद्धे
जपति सिद्धे स्मरति सिद्धे महाविद्ये एकानंशे उमे ध्रुवे अरुंधति सावित्री गायत्री जा
तवेदसे मानस्तोके सरस्वति रमणि रामे धरणि धारणि सौदामिनि अदिति
दिति विनते गौरि गांधारि मातंगी कृष्णे यशोदे सत्यवादिनि ब्रह्मवादिनि काली क
पालिनि करालनेत्रे सद्योपयाचनकरी ॥ जलगतं स्थलगतमंतरिक्षगतं वा मां रक्ष २
सर्वभूतसर्वोपद्रवेभ्यः स्वाहा यस्याः प्रणश्यते पुष्पं गर्भो वा पतते यदि ॥ म्रियंते वा
लका यस्याः काकवंध्या च या भवेत् धारयेद्इमां विद्यां मतैर्दोषैर्न लिप्यते रणे
राजकुले द्यूते नित्यं तस्य जयो भवेत् भूर्जपत्रे लिमां विद्यां लिखित्वा धारयेद्यदि
एतैर्दोषैर्न लिप्यते सुभगा पुत्रिणी भवेत् राक्षं वारयते स्त्रेषा समरे कांडवारिणि
गुल्मशूलाद्धिरोगाणि क्षिप्रं नाशयते यथा शिरोरोगज्वराणां च नाशिनी सर्वदे ८
हिनां ॥ तद्यथा ॥ एकाहिक द्वाहिक त्र्याहिक चातुर्थिका ॥ मासिका द्वैमासिका त्रैमा

मासिका

श्रीगणेशायनमः ॥ श्रीभैरवायनमः ॐ यारा ॥ एतस्यांभैरवोदेवः संसारभयनाशनं
अनेकजन्मकृतंपापंस्मरणेनविनश्यति ॥ १ ॥ ॐ अस्यश्रीभैरवाष्टकस्तोत्रमंत्रस्य।
श्रीईश्वरऋषिः ॥ अनुष्टुप्छंदः ॥ श्रीभैरवोदेवता ॥ ॐ ममसर्वकामनासिध्यर्थेजपे।
पाठेविनियोगः ॥ अथकरन्यासः ॥ ॐ कं अंगुष्ठाभ्यांनमः ॥ ॐ हं तर्जनीभ्यान्नमः ॥ ॐ
खंमध्यमाभ्यान्नमः ॥ ॐ सं अनामिकाभ्यान्नमः ॥ ॐ गं कनिष्ठिकाभ्यान्नमः ॥ ॐ क्षं
करतलकरपृष्ठाभ्यान्नमः ॥ अथहृदयादिन्यासः ॥ ॐ कं हृदयायनमः ॥ ॐ हं शिर
सेस्वाहा ॥ ॐ खं शिखायैवौषट् ॥ ॐ सं कवचायहुं ॥ ॐ गं नेत्रत्रयायवौषट् ॥ ओं क्षं।
अस्त्रायफट् ॥ ककारंहृदयंन्यस्य हकारंनासिकेतथा ॥ खकारंतुललाटेच सकारं
मुखमध्यतः ॥ गकारंरसनान्यस्य ॥ क्षकारंसर्वांगविन्यसेत् ॥ इतिअंगन्यासः ॥ अ
थध्यानम् ॥ ॐ करकलितकपालंकुंडलीदंडपाणिः तरुणतिमिरनीलंव्यालय।
ज्ञोपवीति ॥ क्रतुसमयसपर्य्याविघ्नविच्छेदहेतुर्जयतिबटुकनाथः सिद्धिदः साध
कानाम् ॥ १ ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपमः ॥ भैरवायनमस्तुभ्यमनुज्ञां
दातुमर्हसि ॥ २ ॥ ॐ पूर्वदिशिअसितांगभैरवायनमः ॥ प्राच्यांममरक्षरक्षरक्षका
लकंटकान्भक्षभक्षभक्ष आवाहयाम्यहं ॥ मंत्रतिष्ठतिष्ठतिष्ठहुंफट्स्वाहा ॥ ॐ आ
ग्नेयांरुरुभैरवायनमः ॥ अग्निदिशायांममरक्ष ३ कालकंटकाभक्ष ३ आवाहयाम्य १
हं ॥ मंत्रतिष्ठ ३ हुंफट्स्वाहा ॥ ॐ दक्षिणदिशाचंडभैरवायनमः ॥ दक्षिणदिशायांमम

१ ष्टिका चातुर्मासिक षण्मासिक वातिक पैत्तिक श्लैष्मिक सन्निपातिक सततंज्वर वि
षमज्वर त्रिदशमेद्यस्वर ग्रहनक्षत्रदोषान् हर हर काली सरसर गौरी धम धम विद्ये आले
माले ताले माले गंधे पच २ विद्ये मथ २ विद्ये नाशय २ पापं हर २ दुःस्वप्नविनाशिनि
रजनि संध्ये दुंदुभिनादे मानसवेगे शंखिनि चक्रिणि वज्रिणि शूलिनि अपमृत्यु
विनाशिनी विश्वेश्वरि द्रविडि द्राविडि केशवदयिते पशुपतिसहिते दुंदुरते भा
ममर्दिनि दुंदुभिदमनि शबरी किराति मातंगि ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः श्रां श्रीं श्रूं श्रैं श्रौं
ॐ सौं श्रः तुरु तुरु स्वाहा ये मा हिंसंति प्रत्यक्षं परोक्षं वा तान् सर्वान् दम २ मर्दय २ पा
तय २ शोषय २ उत्सादय २ ब्रह्माणि माहेश्वरी वाराही वैष्णवी वैनायकी कौमारि
नारसिंहि ऐन्द्रि चांद्रि आग्नेयी चंडी चामुंडि वारुणि वायव्ये रक्ष २ प्रचंडविद्ये इं
द्रोपेन्द्रभगिनि जये विजये शांति पुष्टि तुष्टि धृति विवर्द्धिनि कामांकुशे कामदुघे
सर्वकामफलप्रदे सर्वभूतेषु मां मां मां प्रियं कुरु २ स्वाहा ॐ आकर्षिणि आवे-
शिनि ज्वालामालिनि रमणि रामणि तपनी तापनि धरणि मदोन्मादिनि शोषणी सं धारणि
मोहिनि महानीले नीलपताकिनि महागौरी महाप्रिये महाचांद्रि महासौरि महामायूरी
आदित्यरश्मि जाह्नवी यमघंटे किलि किलि चिंतामणि सुरभि सुरोत्पन्ने सर्वकामदु
घे यथा सिद्धिश्चितं कार्यं तन्मे सिध्यतु स्वाहा ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वा
हा ॐ भूर्भुवः स्वः स्वाहा ॐ यतएवागतं पापं तत्रैव प्रतिगच्छतु स्वाहा ॐ बले बले म ६
हाबले असिद्धसाधिनि स्वाहा इति विष्णुधर्मोत्तरे तृतीयकांडे त्रैलोक्यविजयाऽपराजि
तासमाप्ता शुभं भवतु

वंवंवंवायुवेगंशशीघ्रतरतरंब्रह्मपारंपरंतं खंखंखंखड्गहस्तंत्रिभुवननिलयंभास्क
रंभीमरूपं चंचंचंचंचलंतंचलगतिचलितंभूतचक्रंचचालं मंमंमंमायारूपंप्र॰
४ शंशंशंशंखहस्तंशशिकरधवलंमोक्षसंपूर्णतेजं मंमंमंमहद्भूतंकुलमकु
लकुलंमंत्रमूर्तिंसुनित्यं भंभंभंभूतनाथंकिलिकिलिकिलतंगहगहगहातिलकं
अंअंअंअंतरिक्षंप्रणमत॰ ५ खंखंखंखड्गहस्तंविषयामृतमयंकालकालंकरालं
क्षंक्षंक्षंक्षिप्रवेगंदहदहदहनंसप्तद्वीपंप्रमाणं हुंहुंहुंहुंकारनादंप्रकटितगहनंग
जितंभूमिकंपं बंबंबंबालकीलाप्रणमत॰ ६ संसंसंसिद्धियोगंसकलगुणमयं
देवदेवंप्रसन्नं पंपंपंपद्मनाभंहरिहरभुवनंचंद्रसूर्याग्निनेत्रं ऐंऐंऐंऐश्वर्यना
थंसततभयहरंसर्वदेवस्वरूपं रौंरौंरौंरौद्ररूपंप्रण॰ ७ हंहंहंहंसरूपंहसति।
कहकहंमुक्तिदंदीर्घहासं यंयंयंयक्षरूपंशिरकपलजटाबंधबंधाग्रहस्तं टं
टंटंटंकारबाणंत्रिदिशादलदलंकामदर्पापहारं भुंभुंभुंभूतनाथंप्रणमतस
ततंभैरवंक्षेत्रपालं ८ भैरवाष्टकमिदंपुण्यंषण्मासंयःपठेन्नरः सयातिप
रमंस्थानंयत्रदेवोमहेश्वरः ९ इतिश्रीकाशीनाथकृतौश्रीभैरवाष्टकंसंपूर्णं॥
शुभंभवतु श्रीरस्तु श्रीसांबसदाशिवार्पणमस्तु नारायणहरिवासुदेव॥

2.

रक्ष २ कालकंटकान्भक्ष २ आवाहयाम्यहं मंत्रतिष्ठ २ हुं फट् स्वाहा ॐ नैरृत्यदि
शाक्रोधभैरवायनमः ॥ नैरृत्यदिशायांममरक्ष २ कालकंटकान्भक्ष २ आवाहयाम्य
हं मंत्रतिष्ठ २ हुं फट् स्वाहा ॥ ॐ प्रतीच्यादिशायां उन्मत्तभैरवायनमः ॥ प्रतीच्यादिशा
ममरक्ष २ कालकंटकान्भक्ष २ आवाहयाम्यहं मंत्रतिष्ठ २ हुं फट् स्वाहा ॥ ॐ वायव्य
दिशाकपालभैरवायनमः ॥ वायव्यदिशायांममरक्ष २ कालकंटकान्भक्ष २ आवाह
याम्यहं मंत्रतिष्ठ २ हुं फट् स्वाहा ॥ ॐ उदीच्यदिशा भीषणभैरवायनमः ॥ उदीच्य
दिशायांममरक्ष २ कालकंटकान्भक्ष २ आवाहयाम्यहं मंत्रतिष्ठ २ हुं फट् स्वाहा ॥ ॐ
ईशान्यदिशा सिंहभैरवायनमः ॥ ईशान्यदिशायांममरक्ष २ कालकंटकान्भक्ष २
आवाहयाम्यहं मंत्रतिष्ठ २ हुं फट् स्वाहा ॥ ॐ ह्रीं ह्रीं ह्रीं नमो भगवते भैरवायनमः इति
मंत्रमष्टोत्तरशतं जपित्वा ॥ ॐ अस्य श्रीभैरवस्तोत्रमंत्रस्य ईश्वरऋषिः अनुष्टु
प् छंदः श्रीभैरवोदेवता ममचतुर्वर्गसिद्ध्यर्थे जपेपाठे विनियोगः ॥ पूर्ववन्न्या
संकुर्यात् ॐ श्रीगुरवेन्नमः ॥ ॐ यं यं यं यक्षरूपं दशदिशावसितं भूमिकंपाय
मानं सं सं सं संहारमूर्तिं शिरकपिलजटाशेखरं चंद्रबिंबं ॥ दं दं दं दीर्घकायं विकृत
नखमुखं चोर्ध्वरोमं करालं ॥ पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालं ॥ रं रं
रं रक्तवर्णं कटिकटिततनुं तीक्ष्णदंष्ट्राकरालं ॥ घं घं घं घोषघोषं घघघघघटितं घ
र्घुं घुं घुं धूम्रवर्णं स्फुटविकृतमुखं भास्करं भीमरूपं ॥ रुं रुं रुं रुंडमालं रुधिरतनुमयं ताम्र
नेत्रं करालं ॥ नं नं नं नग्नरूपं प्रणमत सततं भैरवं क्षेत्रपालं ॥ २ ॥